# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम्** - ५ (New) | **गुणाः** - ७० |
| **विषयः** - नव्यव्याकरणम् (मुख्यविषयः) | **कोड**- **CC - 2.3.5** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - ०८/१२/२०१८ | **सन्दर्भग्रन्थः**- वैयाकरणसिद्धान्तकौमुदी (आत्मनेपदतः कृदन्तकृत्यप्रकरणम्) | |

**प्र-१ अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या ।** १०

१. समवप्रविभ्यः स्थः ।

२. आत्मनेपदेष्वन्यतरस्याम् ।

३. विभाषोपपदेन प्रतीयमाने ।

**प्र-२ अधोलिखितेषु पञ्चानां ससूत्रं साधनिकाः कार्या ।** १०

१. अनुक्रीडते

२. भिक्षुकः प्रभुमुपतिष्ठते उपतिष्ठति वा

३. संपश्यते

४. धर्मार्थं विनियुङ्क्ते

५. स्वं कटं करोति कुरुते वा

६. रथेन समुदाचरते

७. प्रवहति

८. वर्त्स्यति

**प्र-३ निम्नाङ्कितेषु द्वयोः उत्तरं लिखत ।** १०

१. अनुपराभ्यां कृञः सूत्रस्य सोदाहरणं व्याख्या कार्या ।

२. **इह दीर्घश्चिण्वदिट् लत्वदत्वे द्वित्वत्रिकं तथा ।**
**इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतम् ॥** कारिका व्याख्येया ।

३. नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः सूत्रं व्याख्यात ।

**प्र-४ निम्नाङ्कितेषु पञ्चानां ससूत्रं सिद्धिः कार्या ।** १०

१. अनुभूयते

२. स्मारिता-स्मर्ता

३. बुभूषाञ्चक्रे

४. प्रवहति

५. अगारिध्वम्

६. अभाजि

७. भो वेदमधीयीय उत तर्कम्

८. अचिकीर्षिष्ट

**प्र-५ अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः व्याख्या कार्या ।** १०

१. **आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।**
**श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥** इति कारिका व्याख्येया ।

२. ह्रस्वस्य पिति किति तुक् ।

३. क्रतौ कुण्डपाय्यसंचाय्यौ ।

**प्र–६ निम्नलिखितप्रयोगेषु पञ्चप्रयोगाः साधनीयाः । १०**

१. वसतीति वास्तव्यः

२. चेयम्

३. अनुवाद्यम्

४. संभृत्याः

५. उज्झिता

६. कार्यम्

७. त्याज्यम्

८. संचीयतेऽसौ संचाय्यः

**प्र–७ अधोनिर्दिष्टप्रश्नेषु दशानामुत्तराणि लिखत । १०**

१. सम् उपसर्गपूर्वकदाण् धातोः आत्मनेपदं कदा भवति ?

२. धातोः युक् आदेशः कदा भवति ?

३. कर्तरि कर्मव्यतिहारे सूत्रे प्रयुक्तस्य कर्मपदस्यार्थः कः ?

४. अकर्मकधातोः का परिभाषा वर्तते ?

५. भावे कर्म वाच्ये वा धातोः तस्य स्थाने के प्रत्ययाः क्रियन्ते ?

६. भञ्जेश्च चिणि इति सूत्रेण किं भवति ?

७. लट् स्मे इति सूत्रं कस्य सूत्रस्य अपवादसूत्रम् ?

८. मार्ग्यः इत्यत्र केन सूत्रेण कुत्वं क्रियते ?

९. पूर्ववत् सनः सूत्रेण किं भवति ?

१०. समस्तृतीयायुक्तात् सूत्रे तृतीयायुक्तात् पदस्य किं प्रयोजनम् ?

११. साहसिक्य शब्दस्यार्थः कः ?

१२. विभाषा चिण्णमूलोः सूत्रे चिण्णमूलौ इत्यत्र कः समासः ?

१३. अभिज्ञावचने लृट् सूत्रे अभिज्ञा शब्दस्यार्थः कः ?

१४. वर्तमानसामीप्ये वर्तमानवद्वा सूत्रस्यार्थः कः ?

१५. हेतुहेतुमतोर्लिङ् कीदृशं सूत्रम् (सूत्रस्य प्रकारः कः) ?